**नञर्थः**

**Dr. G. S.V. Dattatreya Murthy**
Assistant Professor
Department of Sanskrit & IC
SCSVMV (Deemed to be university)
Enathur, Kanchipuram - 631561

नञ्तत्पुरुषविधायके नञ् सूत्रे भाष्ये **अब्राह्मण** इत्यादिषु पूर्वपदार्थस्य प्राधान्यं वा, उत्तरपदार्थस्य प्राधान्यं वा, अन्यपदार्थस्य प्राधान्यं वा इति पक्षत्रयम् आशङ्कितम्। इत्थं हि तत्र पक्षत्रयस्य सम्भवः कैयटेन एवं व्याख्यातः- यदा ब्राह्मणादिशब्दाः जातौ वर्तन्ते, अविद्यमानं ब्राह्मण्यं यस्य सोब्राह्मणः क्षत्रियादिः तदा अन्यपदार्थः प्रधानः इति भवत्यन्यपदार्थप्रधानः। यदा तु असत्सामान्यावृत्तिः(असत्सामान्यम्=अभावः=भेदः) नञ्, ब्राह्मणत्वेतरजातिमान् अर्थः क्षत्रियादिः अब्राह्मणशब्देनोच्यते तदा पूर्वपदार्थः प्रधानमिति पूर्वपदार्थप्रधानः। यदा तु दुरुपदेशात् मिथ्याज्ञानाद्वा ब्राह्मणशब्दः क्षत्रिये प्रयुज्यते, स्वाभाविकी च ब्राह्मणत्वनिवृत्तिः नञा प्रत्याय्यते निवृत्तब्राह्मणत्ववान् इति च बोधः तदा उत्तरपदार्थप्राधान्यात् उत्तरपदार्थप्रधानो भवति। एवं पक्षत्रये अन्यपदार्थप्राधान्ये **अवर्षा हेमन्तः** इत्यादिषु अन्यपदार्थप्राधान्यप्रयुक्तलिङ्गसंख्याद्यापत्तिः, पूर्वपदार्थप्राधान्ये अव्ययत्वापत्तिरिति चोक्त्वा उत्तरपदार्थप्राधान्यमेवोरीकृतम्। अस्मिन् पक्षे **अब्राह्मणमानय** इत्युक्ते ब्रह्मणमात्रस्यानयनं प्राप्नोतीति इत्याशङ्कायां यथा राजपुरुष इत्युक्ते राज्ञः विशेषकत्वात् पुरुषमात्रस्य आनयनं न भवति, तथा अत्रापि नञ्विशेषकः प्रयुज्यते, तस्मात् नञ्विशिष्टस्यानयनं भविष्यतीत्युक्तम्। ततः नञ्विशिष्टस्य अब्राह्मण इत्यस्य अर्थः कः इत्यभिप्रायेण **कः पुनरसौ** इति पृष्टे **निवृत्तपदार्थकः** इति समाहितम्। निवृत्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन् स क्षत्रियादिः इत्यर्थः। सादृश्यादिना अध्यारोपितब्राह्मण्यो नञ्द्योतिततदवस्थ इत्यर्थः कैयटः। एवं च समभिव्याहृतपदार्थनिवर्तकत्वमेव नञर्थः इति लभ्यते। तत्र पदार्थस्य सर्वथा निवृत्तौ विशेषणमेव न युज्येतेति निवृत्तमुख्यब्रह्मणत्वादिः, आरोपितब्राह्मणत्ववान् इति भाष्याशयः। तस्मात् आरोपितत्वं नञ्द्योत्यमिति फलितार्थः। एवञ्च अब्राह्मणः इत्यादौ नञा आरोपितत्वं द्योत्यते आरोपितः ब्रह्मणः इति बोधः। ब्राह्मणभिन्नोयमिति बोधस्तु पार्ष्टिकः आर्थिकश्च। एवमुत्तरपदार्थस्य प्राधान्यात् असर्वस्मै इत्यादिषु सर्वनामकार्याणि सिध्यन्ति। अन्यथा सर्वशब्दार्थस्य प्राधान्याभावरूपगौणत्वात् सर्वनामसंज्ञैव न स्यात्। एवं **अत्वं भवसि अनहं भवामि** इत्यत्र पुरुषव्यवस्था। **सेव्यते नैकया** इत्यादौ वचनव्यवस्था च सिध्यति। एवं समस्तनञः आरोपितार्थकत्वे निश्चिते असमस्तनञः अपि

तदर्थकत्वमेवोचितमिति घटो नास्तीत्यादीनां घटकर्तृकारोपिता सत्ता इत्यादिरूपेण बोधः। निपातानां वाचकत्वे आरोपः नञर्थः। विषयत्वं संसर्गःइति दीक्षितादीनामाशयः।

**कौण्डभट्टस्य हृदयम्**

अभावस्य नञवाच्यत्वे घटो नास्ती त्यादौ अभावबुद्धिः न स्यात्। तथा च घटवत्ताज्ञानप्रतिबन्धादिकं च न स्यात्। पश्चाज्जायमानार्थिकबोधमादाय तदिति नाशङ्कनीयम्। नियमतः तज्ञापकाभावात्। आरोपस्य च अभावबुद्धावहेतुकत्वात् नारोपस्य तज्ज्ञापकतापि। किञ्च **न अस्माकमेकं सुखम्** इत्यत्र अभावबोधः भाष्यसम्मतः। निषेधपदादिना च अभाव एव बोध्यते। अब्राह्मण इत्यादीनाम् आरोपितो ब्राह्मण इत्यादि बोधस्य अननुभाविकत्वात्। अभावबोधस्यैव सर्वसिद्धत्वात्। इति। एतत्सर्वं मनसि निधाय स्वाशयमाविष्कृतवान् अभावो वा तदर्थोऽस्तु इत्यादिना।

************************

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV